आत्मा सिद्ध्यति १२। आक्षिपति। स्मृतिर्हि स्मर्त्तव्यविषयिणीति नियमस्तस्याश्च दर्शनादिना सामानाधिकरण्ये मानाभावात् अस्तु वा विषयतयैव सामानाधिकरण्यमिति भावः १३। समाधत्ते। उक्तप्रतिषेधोन युक्तः धर्म्मिग्राहकमानेन स्मृतेरात्मगुणत्वात्परिशेषेणात्मगुणत्वसिद्धेरहं स्मरामीत्यनुभवात् विषयनिष्ठकार्य्यकारणभावे चैत्रस्य ज्ञानान्मैत्रस्य स्मरणापत्तेरिति भावः १४। विषयाणां स्मर्त्तव्यानां स्मृतिसमवायित्वम् स्यादित्याशङ्क्य समाधत्ते। अपरिसङ्ख्यानात् आनन्त्यात् तथा च लाघवादतिरिक्तात्मसिद्धिः। इदं न सूत्रं किन्तु भाष्यमिति केचित् १५। समाप्तं चक्षुरद्वैतप्रकरणम्। ननु मनसोनित्यत्वादात्मत्वमस्त्वित्याशङ्कते। नातिरिक्त आत्मा आत्मसाधकमानानां मनसार्थान्तरत्वमिति भावः १६। समाधत्ते। यदि मनसो ज्ञातृत्वं तदा व्यासङ्गाद्युपपादनाय करणान्तरमवश्यं वाच्यं तथा चैको ज्ञाता ज्ञानसाधनं चैकं सिद्धं मन आत्मास्त्विति संज्ञामात्रं किञ्च व्यासङ्गोपपादकतया मनसोऽणुत्वं सिद्धमात्मनश्च प्रत्यक्षोपपादकतया महत्त्वमिति भेद आवश्यक इति भावः १७। ननु रूपादिप्रत्यक्षम् सकरणकमस्तु न तु सुखादिप्रत्यक्षम् एवं परमाण्वन्तरस्यातीन्द्रियत्वेऽपि मनसः प्रत्यक्षम् स्यादत आह। उक्तोनियमविशेषोनिरनुमानः निष्प्रमाणकः गौरवाद्वैपरीत्ये च विनिगमकाभावाच्चेति भावः १८। समाप्तम् मनोभेदप्रकरणम्। एवं साधितेऽपि देहादिभिन्ने आत्मनि विना तन्नित्यतां न परलोकार्थिनः प्रवृत्तिरतः आत्मनित्यताप्रतिपादनाय सूत्रम्। जातस्य बालस्य एतज्जन्माननुभूतेष्वपि हर्षादिहेतुषु सत्सु हर्षादीनां सम्प्रतिपत्तिः उत्पत्तिस्तस्याः पूर्व्वापूर्व्वानुभवाधीन स्मृतिसम्बन्धादेव सम्भवात् इत्थं चेदानीन्तनस्यात्मनः पूर्व्वपूर्व्वसिद्धौ तस्यानादित्वमनादेश्च भावस्य न नाश इति नित्यत्वसिद्धिरिति भावः १९। अत्र शङ्कते। बालस्य हर्षादयोमुखविकासाद्यनुमेया न च तत्सम्भवः पद्मादीनां प्रबोधादिवददृष्टविशेषाधीनक्रियावशादेव तदुपपत्तेरिति भावः २०। सिद्धान्तयति। उक्तं न युक्तं यतः पञ्चात्मकानां पाञ्चभौतिकानां पद्मादीनां ये विकारास्तेषाम् उष्णकालादिनिमित्तत्वात् मनुष्यादीनान्तु हर्षादिनिमित्तका मुखविकासादय इति न तुल्यतेति भावः २१। आत्मनित्यत्वे हेत्वन्तरमाह। प्रेत्य मृत्वा जातमात्रस्य यः स्तन्याभिलाषः स तावदाहाराभ्यासजनितः जन्मान्तरीणाहारेष्टसाधनताधीजन्यजीवनादृष्टोद्बोधितसंस्काराधीनेष्टसाधनतास्मरणेन हि बालःस्तनपाने प्रवर्त्तत इत्यनेनादित्वमिति २२। शङ्कते। यथाऽयस्कान्तसन्निहितस्यायसोऽयस्कान्ताभिमुखतया गमनं तथैव वत्सस्यापि स्तनोपसर्पणं न त्विष्टसाधनताज्ञानाधीनप्रवृत्तिजन्या चेष्टेयमित्यर्थः २३। समाधत्ते। स्तनपानएव बालः प्रवर्त्तते नत्वन्यत्रेति नियमः कथं स्यात्। वस्तुतस्तु अन्यत्र अयसि प्रवृत्त्यभावात् प्रवृत्तिर्हि चेष्टानुमिता लिङ्गं न तु क्रियामात्रमतोन व्यभिचार इति भावः २४। हेत्वन्तरमाह वीतरागोरागशून्यस्तावन्नोत्पद्यतेऽपि तु सरागतएव जन्मान्तरीयेष्टसाधनताज्ञानाधीनस्मरणं हेतुरिति पूर्व्वं स्तन्याभिलाषउक्तः सम्प्रति तु पतगादीनां कणादिभक्षणाभिलाषसाधारणं रागमात्रमित्यपौनरुक्त्यम् २५" वृत्तिः।

वैशेषिकसूत्रोपस्कारयोरात्मसाधनपुरस्सरं तस्य देहाद्यतिरिक्तता साधिता यथा "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्यो ऽर्थान्तरस्य हेतुः" १। "सोऽनपदेशः" २। "कारणाज्ञानात्" ३। "कार्य्येषु ज्ञानात्" ४। "अज्ञानाच्च" ५। अन्यदेव हेतुरित्यनपदेशः" ६। "अर्थान्तरं ह्यर्थान्तरस्याऽनपदेशः" ७ सू० "इन्द्रियार्थप्रसिद्धेरात्मपरीक्षायामुपयोगमाह। हेतुर्लिङ्गमर्थान्तरस्य आत्मनः इन्द्रियार्थेभ्य इति इन्द्रियेभ्योऽर्थेभ्यश्च रूपादिभ्यस्तद्वद्भ्यश्च यदर्थान्तरम् आत्मा तस्य लिङ्गमित्यर्थः। यद्यपि ज्ञानमेव लिङ्गमिह विवक्षितं तथापीन्द्रियार्थप्रसिद्धेरूपादिसाक्षात्कारस्य प्रसिद्धतरतया तादृप्येणैव लिङ्गत्वमुक्तम्। तथाहि प्रसिद्धिः क्वचिदाश्रिता कार्य्यत्वात् घटवत् गुणत्वाद्वा क्रियात्वाद्वा सा च प्रसिद्धिः करणजन्या क्रियात्वात् छिदिक्रियावत् यच्च प्रसिद्धेः करणं तदिन्द्रियं तच्च कर्तृप्रयोज्यं करणत्वात् वास्यादिवत् तथा यत्रेयं प्रसिद्धिराश्रिता, यः घ्राणादीनां करणानां प्रयोक्ता स आत्मा १। ननु शरीरमिन्द्रियाणि वा प्रसिद्धेराश्रयोऽस्तु प्रसिद्धिं प्रति तदुभयान्वयव्यतिरेकयोः स्फुटतरत्वात् किं तदन्याश्रयकल्पनया तथाहि चैतन्यं शरीरगुणः तत्कार्यत्वात् तद्रूपादिवत् एवमिन्द्रियगुणत्वेऽपि वाच्यमित्याशङ्क्याह। अपदेशो हेतुः तदाभासोऽनपदेशः तथाच तत्कार्यत्वं प्रदीपजन्यज्ञानादावनैकान्तिकत्वादनपदेश इत्यर्थः २। ननु तत्कार्यत्वं चैतन्यत्वावच्छिन्नस्यैव कार्यत्वं विवक्षितं प्रदीपादीनाञ्च समस्तमेव चैतन्यं न कार्यमिति न व्यभिचार इत्याशङ्क्याह। शरीरकारणानां करचरणादीनां तदवयवानां वा अज्ञानात् ज्ञानशून्यत्वादित्यर्थः। पृथिव्यादि-